भारतमञ्जरी/महाप्रस्थानिकंपर्व

< भारतमञ्जरी

महाप्रस्थानिकंपर्व

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।

देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १७.१ ॥

अथ वृष्णिक्षयं श्रुत्वा धर्मसूनुर्धनंजयात् ।

नमः कालाय बलिने निःश्वसन्नित्यभाषत ॥ १७.२ ॥

सर्वत्यागकृतो योगो विवेश भ्रातृभिः सह ।

राज्यं दौर्योधनं दत्त्वा गुणाहार्य युयुत्सवे ॥ १७.३ ॥

निजे परिक्षितं राज्ये स्थापयित्वाभिमन्युजम् ।

तत्पालने समादिश्य सुभद्रं सत्यशासनः ॥ १७.४ ॥

प्रकृतिभ्यो विनिक्षिप्य तं द्विजेभ्यश्च धर्मवित् ।

श्राद्धं विधाय बन्धुभ्यः पुण्यामिष्टिं च नैष्ठिकीम् ॥ १७.५ ॥

अग्नीनुत्सृज्य सलिले पौरानाश्वास्य दुःखितान् ।

देवीमामन्त्र्य वसुधां सानुजो द्रौपदीसखः ।

प्रतस्थे सर्वसंन्यासी योगयुक्तो युधिष्ठिरः ॥ १७.६ ॥

ततः समेत्य भगवान्स्वयमेव हुताशनः ।

पार्थाज्जग्राह गाण्डीवं तौ चाक्षय्यौ महेषुधी ॥ १७.७ ॥

श्वाताननुययावेको वार्यमाणोऽपि यत्नतः ।

अथ ते शनकैः प्रापुर्दिशं दक्षिणपश्चिमाम् ॥ १७.८ ॥

दृष्ट्वा तत्र समुद्रेण भृतां द्वारवतीं जलैः ।

आशामुदीचीं प्रययुर्भुवः कृत्वा प्रदक्षिणम् ॥ १७.९ ॥

हिमाचलमतिक्रम्य प्राप्तास्ते वालुकार्णवम् ।

ददृशुर्मेरुमुत्तुङ्गशृङ्गालिङ्गितनन्दनम् ॥ १७.१० ॥

निरगारे निरालम्बे तस्मिन्नध्वनि दुस्तरे ।

शिरीषपेलवतनुः पपात द्रुपदात्मजा ॥ १७.११ ॥

तां यातजीवितां दृष्ट्वा भीमः प्राह युधिष्ठिरम् ।

राजन्पाञ्चालराजस्य सुतेयं पतिता भुवि ॥ १७.१२ ॥

चिन्तयन्नपि पश्यामि नास्याः किमपि किल्बिषम् ।

कस्मादेषा तपोयेगं त्यक्त्वा पञ्चत्वमागता ॥ १७.१३ ॥

धर्मसूनुर्निशम्यैतदनावृत्तमुखोऽवदत् ।

बभुव पक्षपातोऽस्याः सर्वदाभ्यधिकोर्ऽजुने ॥ १७.१४ ॥

इत्युक्ते भूमिपालेन सहदेवोऽपतद्भुवि ।

तस्मिन्निपतिते पृष्टो भीमेनोचे नृपः पुनः ॥ १७.१५ ॥

एष प्रज्ञाभिमानेन जडं जगदमन्यत ।

इति धर्मसुतेनोक्ते पपात नकुलः क्षितौ ॥ १७.१६ ॥

राजा पृष्टोऽथ भीमेन व्रजन्नेवाब्रवीत्पुनः ।

रूपमानी स्मरेणापि स्पर्धामेष न च क्षमी ॥ १७.१७ ॥

इत्युक्ते व्रजता राज्ञा निपपात धनंजयः ।

पुनश्च पृष्टो भीमेन जगाद जगतीपतिः ॥ १७.१८ ॥

शूरमानी चचारैष शिथिलं समराङ्गने ।

इति ब्रुवाणो भूपालो जगामैवाविलुप्तधीः ॥ १७.१९ ॥

भीमस्ततो निपतितः पतितोऽस्मीत्युवाच तम् ।

सोऽब्रवीद्बलदर्पोऽभूद्भीम बह्वशनस्य ते ॥ १७.२० ॥

ततोऽभूदेक एवाथ व्रजन्ननुगतः शुना ।

ददर्श साक्षादायातं रथेनेन्द्रं युधिष्ठिरः ॥ १७.२१ ॥

राजन्मत्पुरमेहीति शक्रेणोक्तो जगाद सः ।

शुना विरहितः स्वर्गं सशरीरो न कामये ॥ १७.२२ ॥

तमब्रवीत्सुरपतिः शुनां स्वर्गे कुतो गतिः ।

धिष्ण्यमारोहतु श्वेति त्वदन्यः कोऽनुभाषते ॥ १७.२३ ॥

ततस्तमूचे नृपतिर्भक्तत्यागं कथं सहे ।

भक्तविद्वेषिणः स्वर्गे नृशंसस्य कुतो गतिः ॥ १७.२४ ॥

यद्यस्ति सुकृतं किंचिन्मम तेन सुरेश्वर ।

यातु स्वर्गं सदेहः स्वा नैनं त्यक्तुं समुत्सहे ॥ १७.२५ ॥

स्त्रीवधेनैव सदृशं ब्रह्मस्वहरणेन च ।

सर्वपापात्मकं सन्तो भक्तत्यागं प्रचक्षते ॥ १७.२६ ॥

इत्युक्ते धर्मराजेन धर्मस्त्यक्त्वा श्वविग्रहम् ।

तमूचे पुत्र तुष्टोऽस्मि सद्वृत्तेन तवामुना ॥ १७.२७ ॥

दृष्टोऽसि पाथसो हेतोः पुरा द्वैतवने मया ।

स्वस्ति ते व्रज भूपाल सशरीरः सुरालयम् ॥ १७.२८ ॥

इति पित्रा समादिष्टो विमानं विपुलप्रभम् ।

आरुह्य पुण्यसोपानं विवेश सुरमन्दिरम् ॥ १७.२९ ॥

पूज्यमानः सुरैः सार्धं मुनिभिर्नारदादिभिः ।

राजर्षितारकामध्ये स रराजांशुमानिव ॥ १७.३० ॥

ततः स शक्रमवद्भ्रातरो यत्र मे स्थिताः ।

श्यामा च यत्र दयिता तत्र वासो ममेप्सितः ॥ १७.३१ ॥

तमब्रवीत्सहस्राक्षो भावं मा मानुषं गमः ।

राजर्षिभिरनासाद्यां प्राप्तोऽसि गतिमुत्तमाम् ॥ १७.३२ ॥

इत्युक्तोऽप्यसकृद्यत्नाद्वज्रिणा धर्मनन्दनः ।

भ्रातॄनवाप्तुमिच्छामीत्यभाषत पुनः पुनः ॥ १७.३३ ॥

इति श्रीक्षेमेन्द्रविरचितायां भारतमञ्जर्यां महाप्रस्थानिकं पर्व

"https://sa.wikisource.org/w/index.php?title=भारतमञ्जरी/महाप्रस्थानिकंपर्व&oldid=102003" इत्यस्माद् पुनः प्राप्तिः

- ३१ जनवरी २०१७ (तमे) दिनाङ्के अन्तिमसम्पादनं ०८:०३ समये अभवत्
- पाठः क्रियेटिव कॉमन्स ऐट्रिब्यूशन/शेयर-अलाइक अभिज्ञापत्रस्य अन्तर्गततया उपलब्धः अस्ति; अन्याः संस्थित्यः अपि सन्ति । अधिकं ज्ञातुम् अत्र उपयोगस्य संस्थितिं पश्यतु ।